कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ द्वितीय काण्डे चतुर्थः प्रश्नः॥

हरिः ओम्॥ देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षाग्ंसि पिशाचास्तेऽन्यतस्तेषां देवानामुत यदल्पं लोहितमकुर्वन्तद्रक्षाग्ंसि रात्रीभिरसुभ्नन्तान्थ्सुब्धान्मृतानभि व्यौच्छत्ते देवा अविदुर्यो वै नोऽयं म्रियते रक्षाग्ंसि वा इमं घ्नन्तीति ते रक्षाग् स्युपाऽमन्त्रयन्त तान्यब्रुवन्वरं वृणामहै य- [१] दसुराञ्जयाम तन्नः सहाऽसदिति ततो वै देवा असुरानजयन्तेऽसुराञ्जित्वा रक्षाग् स्यऽपानुदन्त तानि रक्षाग् स्यनृतमकर्तेति समन्तं देवान्पर्यविशन्ते देवा अग्नावनाथन्त तेऽग्नये प्रवते पुरोडाशमष्टाकपालं निरवपन्नग्नये विबाधवतेऽग्नये प्रतीकवते यदग्नये प्रवते निरवपन् यान्येव पुरस्ताद्रक्षाग् स्या- [२] सन्तानि तेन प्राऽणुदन्त यदग्नये विबाधवते यान्येवाऽभितो रक्षाग् स्यासन्तानि तेन व्यबाधन्त यदग्नये प्रतीकवते यान्येव पश्चाद्रक्षाग् स्यासन्तानि तेनाऽपाऽनुदन्त ततो देवा अभवन्पराऽसुरा यो भ्रातृव्यवान्थ्स्याथ्स स्पर्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवते [३] ऽग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य एवाऽस्माच्छ्रेयान्भ्रातृव्यस्तं तेन प्र णुदते यदग्नये विबाधवते य एवैनेन सदृङ्क तेन वि बाधते यदग्नये प्रतीकवते य एवाऽस्मात्पापीयान्तं तेनाऽप नुदते प्र श्रेयाग्ंसं भ्रातृव्यं नुदतेऽति सदृशं क्रामति नैनं पापीयानाप्नोति य एवं विद्वानेतयेष्ट्या यजते॥[४]

वृणामहै यत्पुरस्ताद्रक्षाग्ंसि वपेदग्नयं विबाधवत एवं चत्वारि च॥2.4.1॥

देवासुराः संयत्ता आसन्ते देवा अब्रुवन् यो नो वीर्यावत्तमस्तमनु समारभामहा इति त इन्द्रमब्रुवन्त्वं वै नो वीर्यावत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत्तिस्रो म इमास्तनुवो वीर्यावतीस्ताः प्रीणीताऽथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रुवन्नियमग्ं होमुगियं विमृधेयमिन्द्रियावती- [५] ऽत्यब्रवीत्त इन्द्रायाऽग्ंहोमुचे पुरोडाशमेकादशकपालं निरवपन्निन्द्राय वैमृधायेन्द्रायेन्द्रियावते यदिन्द्रायाऽग्ंहोमुचे निरवपन्नग्ंहस एव तेनाऽमुच्यन्त यदिन्द्राय वैमृधाय मृध एव तेनाऽपाऽघ्नत यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽत्मन्नदधत त्रयस्त्रिग्ंशत्कपालं पुरोडाशं निरवपन्त्रयस्त्रिग्ंशद्वै देवतास्ता इन्द्र आत्मन्ननु समारं भयत भूत्यै [६] तां वाव देवा विजितिमुत्तमामसुरैर्व्यजयन्त यो भ्रातृव्यवान्थस्याथस स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाऽग्ंहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावतेऽग्ंहसा वा एष गृहीतो यस्माच्छ्रेयान्भ्रातृव्योयदिन्द्रायाऽग्ंहोमुचे निर्वपत्यग्ंहस एव तेन मुच्यते मृधा वा एषोऽभिषण्णो यस्माथ्समानेष्वन्यः श्रेयानुता- [७] ऽभ्रातृव्यो यदिन्द्राय वैमृधाय मृध एव तेनाऽप हते यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽत्मन्धत्ते त्रयस्त्रिग्ंशत्कपालं पुरोडाशं निर्वपति त्रयस्त्रिग्ंशद्वै देवतास्ता एव यजमान आत्मन्ननु समारं भयते भूत्यै सा वा एषा विजितिर्नामेष्टिर्य एवं विद्वानेतयेष्ट्या यजत उत्तमामेवविजितिं भ्रातृव्येण वि जयते॥[८]

इन्द्रियावती भूत्या उतैकान्न पञ्चाशच्च॥2.4.2॥

देवासुराः संयत्ता आसन्तेषां गायत्र्योजो बलमिन्द्रियं वीर्यं प्रजां पशून्थ्संगृह्याऽऽदायापक्रम्याऽतिष्ठत्तेऽमन्यन्त यतरान् वा इयमुपावथ्स्र्यति त इदं भविष्यन्तीति तां व्यह्वयन्त विश्वकर्मन्निति देवा दाभीत्यसुराः सा नाऽन्यतराग् श्चनोपावर्तत ते देवा एतद्यजुरपश्यन्नोजोऽसि सहोऽसि बलमसि [९] भ्राजोऽसि देवानां धाम नामाऽसि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति वाव देवा असुराणामोजो बलमिन्द्रियं वीर्यं [१०] प्रजां पशूनवृञ्जत यद्गायत्र्यपक्रम्याऽतिष्ठत्तस्मादेतां गायत्रीतीष्टिमाहुः संवथ्सरो वै गायत्री संवथ्सरो वै तदपक्रम्याऽतिष्ठद्यदेतया देवा असुराणामोजो बलमिन्द्रियं वीर्यं प्रजां पशूनवृञ्जत तस्मादेतागं् संवर्ग इतीष्टिमाहुर्यो भ्रातृव्यवान्थ्स्याथ्स स्पर्धमान एतयेष्ट्या यजेताऽग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत्तगं् शृतमासन्नमेतेन यजुषाऽभि मृशेदोज एव बलमिन्द्रियं वीर्यं प्रजां पशून्भ्रातृव्यस्य वृङ्क्ते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति॥[११]

बलमस्येतया देवा असुराणामोजो बलमिन्द्रियं वीर्यं पञ्च चत्वारिगं्शच्च॥2.4.3॥

प्रजापतिः प्रजा असृजत ता अस्माथ्सृष्टाः पराचीरायन्ता यत्राऽवसन्ततो गर्मुदुदतिष्ठत्ता बृहस्पतिश्चाऽन्ववैतागं् सोऽब्रवीद्बृहस्पतिरनया त्वा प्र तिष्ठान्यथ त्वा प्रजा उपावथ्स्र्यन्तीति तं प्राऽतिष्ठत्ततो वै प्रजापतिं प्रजा उपावर्तन्त यः प्रजाकामः स्यात्तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत्प्रजापति- [१२] मेव स्वेन भागधेयेनोप धावति स एवाऽस्मै प्रजां प्र जनयति प्रजापतिः पशूनसृजत

तेऽस्माथ्सृष्टाः पराञ्च आयन्ते यत्राऽवसन्ततो गर्मुदुदतिष्ठत्तान्पूषा चाऽन्ववैताग्ं सोऽब्रवीत्पूषाऽनया मा प्र तिष्ठाऽथ त्वा पशव उपावथ्स्यन्तीति मां प्र तिष्ठेति सोमोऽब्रवीन्मम वा [१३] अकृष्टपच्यमित्युभौ वां प्र तिष्ठानीत्यब्रवीत्तौ प्राऽतिष्ठत्ततो वै प्रजापतिं पशव उपावर्तन्त यः पशुकामः स्यात्तस्मा एतग्ं सोमापौष्णं गार्मुतं चरुं निर्वपेथ्सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मै पशून्प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवाऽस्मै रेतो दधाति पूषा पशून्प्र जनयति॥[१४]

वपेत्प्रजापतिं वै दधाति पूषा त्रीणि च॥2.4.4॥

अग्ने गोभिर्न आ गहीन्दो पुष्ट्या जुषस्व नः। इन्द्रो धर्ता गृहेषु नः॥ सविता यः सहस्रियः स नो गृहेषु रारणत्। आ पूषा एत्वा वसु॥ धाता ददातु नो रयिमीशानो जगतस्पतिः। स नः पूर्णेन वावनत्॥ त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत्। सहस्रेणाऽयुतेन च॥ येन देवा अमृतं [१५] दीर्घग्ग् श्रवो दिव्यैरयन्त। रायस्पोष त्वमस्मभ्यं गवां कुल्मिं जीवस आ युवस्व॥ अग्निर्गृहपतिः सोमो विश्ववनिः सविता सुमेधाः स्वाहा। अग्ने गृहपते यस्ते घृत्यो भागस्तेन सह ओज आक्रममाणाय धेहि श्रैष्ठ्यात्पथो मा योषं मूर्धा भूयासग्ग् स्वाहा॥[१६]

अमृतमष्टात्रिग्ंशच्च॥2.4.5॥

चित्रया यजेत पशुकाम इयं वै चित्रा यद्वा अस्यां विश्वं भूतमधि प्रजायते तेनेयं चित्रा य एवं विद्वाग् श्चित्रया पशुकामो यजते प्र प्रजया पशुभिर्मिथुनैर्जायते

प्रैवाऽऽग्नेयेन वापयति रेतः सौम्येन दधाति रेत एव हितं त्वष्टा रूपाणि वि करोति सारस्वतौ भवत एतद्वै दैव्यं मिथुनं दैव्यमेवाऽस्मै [१७] मिथुनं मध्यतो दधाति पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर्भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक्पुष्टिमेव वाचमुपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनग्ं सप्तैतानि हवीग्ंषि भवन्ति सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाग्ं स्युभयस्याऽवरुद्ध्या अथैता आहुतीर्जुहोत्येते वै देवाः पुष्टि पतयस्त एवाऽस्मिन्पुष्टिं दधति पुष्यतिप्रजया पशुभिरथो यदेता आहुतीर्जुहोति प्रतिष्ठित्यै॥[१८]

*अस्मै त एव द्वादश च॥**2.4.6**॥*

मारुतमसि मरुतामोजोऽपां धारां भिन्धि रमयत मरुतः श्येनमायिनं मनोजवसं वृषणग्ं सुवृक्तिम्। येन शर्ध उग्रमवसृष्टमेति तदश्विना परि धत्तग्ग् स्वस्ति॥ पुरोवातो वर्षञ्जिन्वरावृथ्स्वाहा वातावद्वर्षन्नुग्ररावृथ्स्वाहा स्तनयन् वर्षन्भीमरावृथ्स्वाहाऽ नशन्यवस्फूर्जन्दिद्युद्वर्षन्त्वेषरावृथ्स्वाहाऽतिरात्रं वर्षन्पूर्तिरावृ- [१९] थ्स्वाहा बहु हाऽयमवृषादिति श्रुतरावृथ्स्वाहाऽऽतपति वर्षन्विराडावृथ्स्वाहाऽ वस्फूर्जन्दिद्युद्वर्षन्भूतरावृथ्स्वाहा मान्दा वाशाः शुन्ध्यूरजिराः। ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः। मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह माऽवत। वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोपनह्यामि॥[२०]

*पूर्तिरावृद्दिद्वचत्वारिग्ंशच्च॥**2.4.7**॥*

देवा वसव्या अग्ने सोम सूर्य। देवाः शर्मण्या मित्रावरुणाऽर्यमन्। देवाः सपीतयो ऽपां

नपादाशुहेमन्। उद्नो दत्तोऽदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्याऽवत। दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन। पृथिवीं यद्व्युन्दन्ति॥ आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः। वि पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति [२१] वृष्टयः॥ उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः। न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत॥ सृजा वृष्टिं दिव आद्भिः समुद्रं पृण। अब्जा असि प्रथमजा बलमसि समुद्रियम्॥ उन्नं भय पृथिवीं भिन्धीदं दिव्यं नभः। उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम्॥ ये देवा दिविभागा येऽन्तरिक्षभागा ये पृथिविभागाः। त इमं यज्ञमवन्तु त इदं क्षेत्रमा विशन्तु त इदं क्षेत्रमनु वि विशन्तु॥[२२]

यन्ति देवा विगंशतिश्च॥2.4.8॥

मारुतमसि मरुतामोज इति कृष्णं वासः कृष्णतूषं परि धत्त एतद्वै वृष्ट्यै रूपगं् सरूप एव भूत्वा पर्जन्यं वर्षयति रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति वर्षस्याऽवरुद्ध्यै वातनामानि जुहोति वायुर्वै वृष्ट्या ईशे वायुमेव स्वेन भागधेयेनोप धावति स एवाऽस्मै पर्जन्यं वर्षयत्यष्टौ [२३] जुहोति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव वृष्टिगं् सं प्र च्यावयति कृष्णाजिने सं यौति हविरेवाऽकरन्तर्वेदि सं यौत्यवरुद्ध्यै यतीनामद्यमानानागं् शीर्षाणि पराऽपतन्ते खर्जूरा अभवन्तेषागं् रस ऊर्ध्वोऽपतत्तानिकरीराण्यभवन्थ्सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति यत्करीराणि भवन्ति [२४] सौम्ययैवाऽऽहुत्या दिवो वृष्टिमव रुन्धे

मधुषा सं यौत्यपां वा एष ओषधीनाग्ं रसो यन्मध्वभ्द्य एवौषधीभ्यो वर्षत्यथो अद्भ्य एवौषधीभ्यो वृष्टिं नि नयति मान्दा वाशा इति सं यौति नामधेयैरेवैना अच्छैत्यथो यथा ब्रूयादसावेहीत्येवमेवैना नामधेयैरा [२५] च्यावयति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनग्ं समर्धयति वर्षस्यावरुद्ध्यै॥[२६]

अष्टौ भवन्ति नामधेयैरैकान्न त्रिग्ंशच्च॥2.4.9॥

देवा वसव्या देवाः शर्मण्या देवाः सपीतय इत्या बध्नाति देवताभिरेवाऽन्वहं वृष्टिमिच्छति यदि वर्षेत्तावत्येव होतव्यं यदि न वर्षेच्छ्वो भूते हविर्निर्वपेदहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति नक्तं वा हि दिवा वा वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मा [२७] अहोरात्राभ्यां पर्जन्यं वर्षयतोऽग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतग्ं सप्तकपालग्ं सौर्यमेककपालमग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो न्य ङ्ङ्रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु वै भूत्वा वर्षत्येता वै देवता वृष्ट्या ईशते ता एव स्वेन भागधेयेनोप धावति ता [२८] एवाऽस्मै पर्जन्यं वर्षयन्त्युतावर्षिष्यन्वर्षत्येव सृजा वृष्टिं दिव आऽद्भिः समुद्रं पृणेत्याहेमाश्चैवाऽमूश्चाऽपः समर्धयत्यथो आभिरेवाऽमूरच्छैत्यब्जा असि प्रथमजा बलमसि समुद्रियमित्याह यथायजुरेवैतदुन्नं भय पृथिवीमिति वर्षाह्वां जुहोत्येषा वा ओषधीनां वृष्टिवनिस्तयैव वृष्टिमा च्यावयति ये देवा दिविभागा इति कृष्णाजिनमव धूनोतीम एवाऽस्मै लोकाः प्रीता अभीष्टा भवन्ति॥[२९]

अस्मै धावति ता वा एकविग्ंशतिश्च॥2.4.10॥

सर्वाणि छन्दाग्ं स्येतस्यामिष्ट्यामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यं यत्ककुदुष्णिहा जगत्यै यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दाग्ं स्यव रुन्धे गायत्री वा एषा यदुष्णिहा यानि चत्वार्यध्यक्षराणि चतुष्पाद एव ते पशवो यथा पुरोडाशे पुरोडाशोऽध्येवमेव तद्यदूच्यध्यक्षराणि यज्जगत्या [३०] परिदध्यादन्तं यज्ञं गमयेत्त्रिष्टुभा परि दधातीन्द्रियं वै वीर्यं त्रिष्टुगिन्द्रिय एव वीर्ये यज्ञं प्रति ष्ठापयति नाऽन्तं गमयत्यग्ने त्री ते वाजिना त्री षधस्थेति त्रिवत्या परि दधाति सरूपत्वाय सर्वो वा एष यज्ञो यत्त्रैधातवीयं कामायकामाय प्र युज्यते सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यते त्रैधातवीयेन यजेताऽभिचरन्सर्वो वा [३१] एष यज्ञो यत्त्रैधातवीयग्ं सर्वेणैवैनं यज्ञेनाऽभि चरति स्तृणुत एवैनमेतयैव यजेताऽभिचर्यमाणः सर्वो वा एष यज्ञो यत्त्रैधातवीयग्ं सर्वेणैव यज्ञेन यजते नैनमभिचरन्थ्सृणुत एतयैव यजेत सहस्रेण यक्ष्यमाणः प्रजातमेवैनद्दधात्येतयैव यजेत सहस्रेणेजानोऽन्तं वा एष पशूनां गच्छति [३२] यः सहस्रेण यजते प्रजापतिः खलु वै पशूनसृजत ताग् स्त्रैधातवीयेनैवासृजत य एवं विद्वाग् स्त्रैधातवीयेन पशुकामो यजते यस्मादेव योनेः प्रजापतिः पशूनसृजत तस्मादेवैनान्थ्सृजत उपैनमुत्तरग्ं सहस्रं नमति देवताभ्यो वा एष आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत सर्वो वा एष यज्ञो [३३] यत्त्रैधातवीयग्ं सर्वेणैव यज्ञेन यजते न देवताभ्य आ वृश्च्यते द्वादशकपालः पुरोडाशो भवति ते त्रयश्चतुष्कपालात्त्रिष्षमृद्धत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोका नामाप्त्या उत्तर उत्तरो ज्यायान्भवत्येवमिव हीमे

लोका यवमयो मध्य एतद्वा अन्तरिक्षस्य रूपग्ं समृद्ध्यै सर्वेषामभिगमयन्नव द्यत्यछं बट्कारग्ं हिरण्यं ददाति तेज एवा- [३४] ऽव रुन्धे तार्प्यं ददाति पशूनेवाऽव रुन्धे धेनुं ददात्याशिष एवाऽव रुन्धे साम्नो वा एष वर्णो यद्धिरण्यं यजुषां तार्प्यमुक्थामदानां धेनुरेतानेव सर्वान्वर्णानव रुन्धे॥[३५]

*जगत्याऽभिचरन्थ्सर्वो वै गच्छति यज्ञस्तेज एव त्रिग्ंशच्च॥**2.4.11***॥

त्वष्टा हतपुत्रो वीन्द्रग्ं सोममाऽहरत्तस्मिन्निन्द्र उपहवमैच्छत तं नोपाऽह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्तस्य यदत्यशिष्यत तत्त्वष्टाऽऽहवनीयमुप प्राऽवर्तयथ्स्वाहेन्द्रशत्रुर्वर्धस्वेति स यावदूर्ध्वः पराविध्यति तावति स्वयमेव व्यरमत यदि वा तावत्प्रवणमा- [३६] ऽसीत्यदि वा तावदध्यग्नेरासीथ्स सं भवन्नग्नीषोमावभि समभवथ्स इषुमात्रमिषुमात्रं विष्वङ्व्यवर्धत स इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वं तस्मादिन्द्रोऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत्तपो वै स वज्र आसीत्तमुद्यन्तुं नाशक्नोदथ वै तर्हि विष्णु- [३७] रन्या देवताऽऽसीथ्सोऽब्रवीद्विष्णवेहीदमा हरिष्यावो येनाऽयमिदमिति स विष्णुस्त्रेधाऽऽत्मानं वि न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयमभिपर्यावर्ताद्ध्यबिभेद्यत्पृथिव्यां तृतीयमासीत्तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं [३८] मयि वीर्यं तत्ते प्र दास्यामीति तदस्मै प्राऽयच्छत्तत्प्रत्यगृह्णादऽधा मेति तद्विष्णवेऽति प्राऽयच्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यदन्तरिक्षे तृतीयमासीत्तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं [३९] मयि वीर्यं तत्ते

प्र दास्यामीति तदस्मै प्रायच्छत्तत्प्रत्यगृह्णाद्द्विर्माऽधा इति तद्विष्णवेति प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यद्दिवि तृतीयमासीत्तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हार्येनाऽह- [४०] मिदमस्मि तत्ते प्र दास्यामीति त्वी ३ इत्यब्रवीथ्संधां तु सं दधावहै त्वामेव प्र विशानीति यन्मां प्रविशेः किं मा भुञ्ज्या इत्यब्रवीत्त्वामेवेन्धीय तव भोगाय त्वां प्र विशेयमित्यब्रवीत्तं वृत्रः प्राऽविशदुदरं वै वृत्रः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो [४१] य एवं वेद हन्ति क्षुधं भ्रातृव्यं तदस्मै प्राऽयच्छत्तत्प्रत्यगृह्णात्त्रिर्माऽधा इति तद्विष्णवेऽति प्राऽयच्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यत्त्रिः प्राऽयच्छत्त्रिः प्रत्यगृह्णात्तत्त्रिधातोस्त्रिधातुत्वं यद्विष्णुरन्वतिष्ठत विष्णवेऽति प्राऽयच्छत्तस्मादैन्द्रावैष्णवग्ं हविर्भवति यद्वा इदं किंच तदस्मै तत्प्राऽयच्छदृचः सामानि यजूग्ंषि सहस्रं वा अस्मै तत्प्राऽयच्छत्तस्माथ्सहस्रदक्षिणम्॥[४२]

प्रवणं विष्णुर्वा इदमिदमहं यो भवत्येकविग्ंशतिश्च||**2.4.12**||

देवा वै राजन्याज्जायमानादबिभयुस्तमन्तरेव सन्तं दाम्नाऽपौं भन्थ्स वा एषोऽपोब्धो जायते यद्राजन्यो यद्वा एषोऽनपोब्धो जायेत वृत्रान् घ्नग्ग्श्नरेद्यं कामयेत राजन्यमनपोब्धो जायेत वृत्रान् घ्नग्ग्श्नरेदिति तस्मा एतमैन्द्राबार्हस्पत्यं चरुं निर्वपेदैन्द्रो वै राजन्यो ब्रह्म बृहस्पतिर्ब्रह्मणैवैनं दाम्नोऽपों भनान्मुञ्चति हिरण्मयं दाम दक्षिणा साक्षादेवैनं दाम्नोऽपों भनान्मुञ्चति॥[४३]

एनं द्वादश च||**2.4.13**||

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे। भागं देवेभ्यो वि दधात्यायन्प्र चन्द्रमास्तिरति दीर्घमायुः॥ यमादित्या अग्ंशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति। तेन नो राजा वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः॥ प्राच्यां दिशि त्वमिन्द्रासि राजोतोदीच्यां वृत्रहन्वृत्रहाऽसि। यत्र यन्ति स्रोत्यास्त- [४४] ज्जितं ते दक्षिणतो वृषभ एधि हव्यः। इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयाति। विश्वा हि भूयाः पृतना अभिष्टीरुपसद्यो नमस्यो यथाऽसत्॥ अस्येदेव प्र रिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात्। स्वराडिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय। अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः। ईशान- [४५] मस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः॥ त्वामिद्धि हवामहे साता वाजस्य कारवः। त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥ यद्द्याव इन्द्र ते शतग्ं् शतं भूमीरुत स्युः। न त्वा वज्रिन्थ्सहस्रग्ं् सूर्या अनु न जातमष्ट रोदसी॥ पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाऽद्रिः।[४६] सोतुर्बाहुभ्याग्ं् सुयतो नाऽर्वा॥ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम॥ उदग्ने शुचयस्तव वि ज्योतिषोदु त्यं जातवेदसग्ं् सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याऽग्नेः। आऽप्रा द्यावा पृथिवी अन्तरिक्षग्ं् सूर्य आत्मा जगतस्तस्थुष [४७] श्च॥ विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः। जुषन्तां युज्यं पयः॥ विश्वे देवाः शृणुतेमग्ं् हवं मे ये अन्तरिक्षे य उप द्यविष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्याऽस्मिन्बर्हिषि मादयध्वम्॥[४८]

*तदीशानमद्रिस्तस्थुषस्त्रिग्ंशच्च॥**2.4.14***॥

देवा मनुष्या देवासुरा अब्रुवन्देवासुरास्तेषां गायत्री प्रजापतिस्ता यत्राऽग्ने गोभिश्त्रिया मारुतं देवा वसव्या

अग्ने मारुतमिति देवा वसव्या देवाः शर्मण्याः सर्वाणि त्वष्टा हतपुत्रो देवा वै राजन्यान्नवो नवश्चतुर्दश॥14॥

देवा मनुष्याः प्रजां पशून्देवा वसव्याः परिदध्यादिदमस्म्यष्टाचत्वारिग्ंशत्॥४८॥

देवा मनुष्या मादयध्वम्॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति द्वितीयकाण्डे चतुर्थः प्रश्नः॥